Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : UT-01**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.१. — विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्—अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः -रसगङ्गाधरः—१

**दिनाङ्कः** - 18-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. सङ्क्षिप्तमुत्तरं लिखत** **10x1= 10**

१. रसगङ्गाधरस्य रचयिता कः ?

२. ग्रन्थकारस्य पितुर्नाम किम् ?

३. लोकोत्तरत्वं नाम किम् ?

४. काव्यस्य मुख्यं कारणं किम् ?

५. चतुर्थकाव्यस्य लक्षणं किम् ?

६. रससूत्रं केन विरचितम् ?

७. व्यभिचारिभावस्य लक्षणं किम् ?

८. ग्रन्थकारस्य मते वीरः कतिविधः ?

९. माधुर्यस्य लक्षणं किम् ?

१०. भावशान्तेर्लक्षणं किम् ?

**II. यथारुचि त्रयाणां सङ्क्षेपेणोत्तरयत ।** **3x5= 15**

१. द्वितीयकाव्यस्य लक्षणमुक्त्वा क्वचिल्लक्ष्ये सङ्गमयत ।

२. चतुर्थकाव्यस्य लक्षणं सोदाहरणं समन्वयत ।

३. श्लेषगुणस्य लक्षणमुक्त्वा लक्ष्ये समन्वयत ।

४. व्यभिचारिभावाः कति ? नामनिर्देशनं कुरुत ।

५. रसाभासलक्षणमुक्त्वा क्वचित् समन्वयं कुरुत ।

**III. यथानिर्देशं त्रयाणां सङ्क्षेपेणोत्तरयत ।** **3x10= 30**

१.काव्यस्य कारणं किम् ? मम्मटोक्तं काव्यकारणं निराकृत्य ग्रन्थकारस्याभिप्रायं कथयत ।

२. अभिनवगुप्ताभिमतं रसस्वरूपं लिखत ।

—अनुवर्तते

३. द्वितीयकाव्यस्य लक्षणं सदलकृत्यं विचार्य सोदाहरणं व्याख्यात।

४. 'वीरश्चतुर्धा' सोदाहरणं लिखत।

५. भावत्वं नाम किम्? लक्षणपरिष्कारं कुरुत।

**IV. सप्रसङ्गं पद्यत्रयं व्याख्याय विशेषं सयुक्तिकं प्रतिपादयत। 3x5= 15**

१. मित्रारिपुत्रनेत्राय त्रयीशात्रवशत्रवे।
गोत्रारिगोत्रजत्राय गोत्रात्रे ते नमोनमः॥

२. नितान्तं यौवनोन्मुक्ता गाढरक्ताः सदाहवे।
वसुन्धरां समालिङ्ग्य शेरते वीर तेऽरयः॥

३. ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम्।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः॥

४. मुञ्चसि नाद्यापि रूपं भामिनि मुदितालिरुदिया।
इति तन्व्याः पतिवचनैरपायि नयनाब्जकोणशोणरुचिः॥

५. एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती॥

**V. द्वयोः टिप्पणीमारचत। 2x5= 10**

१. जगन्नाथः

२. शान्तरसः

३. अनौचित्यम्

४. ओजः

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 2

**Code No. : UT-02**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.१. — विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्—अलङ्कारशास्त्रम्

## भागः - १, पत्रिका - २

## विषयः -रसगङ्गाधरः—२

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

I. **एतेषु त्रयाणां लक्षणं लक्ष्ये सङ्गमयत।** **5x3= 15**

१. सहोक्तिः

२. प्रतिवस्तूपा

३. असमः

४. परिणामः

५. उदाहरणम्

II. अप्पय्यदीक्षितस्य भ्रान्तिमदलङ्कृतिलक्षणं लक्ष्यं च दूषयित्वा प्रकृतग्रन्थकृतः भ्रान्त्यलङ्कारस्य स्वरूपं सलक्ष्यं प्रतिपादयत। **10**

III. अप्पय्यदीक्षितस्य स्मृत्यलङ्कृतिलक्षणं प्रकृतग्रन्थोक्तप्रकारं निराकृत्य जगन्नाथस्य स्मृतिलक्षणं सदलकृत्यमुपपादयत। **10**

IV. नव्यमतानुसारं कति प्रभेदातिशयोक्तिः ? सोदाहरणमुपपादयत। **10**

V. अलङ्कारसर्वस्वकृतोक्तनिदर्शनायाः लक्षणं सलक्ष्यं निराकृत्य जगन्नाथसम्मतं लक्षणं लक्ष्ये सङ्गमयत। **10**

VI. 'नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखम्' इत्यत्र विद्यमानमलङ्कारं परमतदूषणपूर्वकं विमृशत। **10**

VII. **एतेषु त्रयाणामलङ्कारं सलक्षणं निरूपयत** **5x3= 15**

१. निर्गुणः शोभते नैव विपुलाडम्बरोऽपि ना।
आपातरम्यपुष्पश्रीशोभितः शाल्मलिर्यथा॥

२. निष्कलङ्कः निरातङ्कः चतुःषष्टिकलाधर।
सदापूर्ण महीप त्वं चन्द्रोऽसीति मृषा वचः॥

—अनुवर्तते

३. प्रिये विषादं जहिहीति वाचं प्रिये वदति प्रियायाः ।
वारामुदारा विजगाल धारा विलोचनाभ्यां मनसश्च मानः ॥

४. अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलेपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : UT-03**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्–अलङ्कारशास्त्रम्

## भागः - १, पत्रिका - ४

## विषयः - ध्वन्यालोकः-१

**दिनाङ्कः** - 20-03-2014 ] **[ गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. सङ्क्षिप्तमुत्तरं लिखत** **10x1= 10**

१. अभाववादिनां समानमुपसंहारवाक्यं किम् ?

२. लोचनकारस्य गुरुः कः ?

३. महीकवीनां सरस्वती अलोकसामान्यं कमभिव्यनक्ति ?

४. ध्वनिः भक्त्या नैकत्वं बिभर्ति-कुतः ?

५. कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम्-अत्र वदतीत्यस्य लक्ष्यार्थः कः ?

६. वाच्यव्यङ्ग्ययोः प्राधान्यविवक्षा किं निबन्धना ?

७. गुणाः कमर्थमवलम्बन्ते ?

८. रौद्रादयो रसाः कया लक्ष्यन्ते ?

९. शृङ्गारस्याङ्गिनः कीदृशोऽनुप्रासो न प्रकाशकः ?

१०. ध्वन्यात्मभूते शृङ्गारे कस्य निबन्धनं शक्तावपि प्रमादित्वम् ?

**II. वाक्यत्रयं सप्रसङ्गं व्याख्यात ।** **3x5= 15**

१. शोकः श्लोकत्वमागतः ।

२. स हि कदाचिद्वाच्ये विधिरूपे प्रतिषेधरूपः ।

३. व्यङ्ग्यप्राधान्ये ध्वनिः। न चैतत्समासोक्त्यादिष्वस्ति ।

४. स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः ।

५. यत्राविष्क्रियते स्वोक्त्या सान्यैवालङ्कृतिर्ध्वनेः ।

–अनुवर्तते

**III.** **त्रीन् प्रश्नानुत्तरयत** 3x10= 30

१. तदभाववादिनाममी विकल्पाः सम्भवन्ति- के ते ? विवृणुत ।

२. स्वेच्छाकेसरिण इति पद्यं विलिख्य व्याख्यात ।

३.गुणानां लक्षणं किम् ? तत्प्रभेदानां रसेषु कीदृशी स्थितिः ? विशदयत ।

४. काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः-परमतं निरस्य सिद्धान्तं समर्थयत ।

५. रूपकादेरलङ्कारस्य अङ्गत्वसाधनानि कानि ? सोदाहरणं स्फुटयत ।

**IV.** **पद्यत्रयं सप्रसङ्गं व्याख्याय तत्रत्यं विशेषं सयुक्तिकमाविष्कुरुत ।** 3x5= 15

१. सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।

२. कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् ।
सभ्रमरपद्माघ्रायिणि वारितवामे सपष्वेदानीम् ।।

३. रविसङ्क्रान्तसौभाग्यस्तुषारावृतमण्डलः ।
निश्वसान्ध इवादर्शश्चन्द्रमा न प्रकाशते ।।

४. उन्नतः प्रोल्लसद्धारः कालागरुमलीमसः ।
पयोधरभरस्तन्व्याः कं न चक्रेऽभिलाषिणम् ।।

**V.** **कारिकाद्वयं सप्रसङ्गं विवृणुत ।** 2x5= 10

१. प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनम् ।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ।।

२. आलोकार्थी यथा दीपशिखायां यत्नवाञ्जनः ।
तदुपायतया तद्वदर्थे वाच्ये तदादृतः ।।

३. यत्र प्रतीयमानोऽर्थः प्रक्लिष्टत्वेन भासते ।
वाच्यस्याङ्गतया वापि नास्यासौ गोचरो ध्वनेः ।।

—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 2

**Code No. : UT-04**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्—अलङ्कारशास्त्रम्

## भागः - १, पत्रिका - ४

## विषयः - हर्षचरितं प्राकृतप्रकाशश्च ।

**दिनाङ्कः** - 21-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. एतेषु प्रश्नद्वयमुत्तरयत ।** **10x2= 20**

१. हर्षचरितस्य कथात्वं वा ? आख्यायिकात्वं वा ? विमृशत ।

२. ग्रन्थोक्तदिशा बाणस्य वात्स्यायनवंशस्य वर्णनं कुरुत ।

३. भैरवाचार्यं वर्णयत ।

४. हर्षचरितस्य तृतीयोच्छ्वासस्य सारांशं लिखत ।

**II. वाक्यत्रयं सप्रसङ्गं व्याख्यात ।** **3x4= 12**

१. क्षमा हि मूलं सर्वतपसाम् ।

२. न च बालिशता चपलता चारणता वा वाचलततायाः कारणम् ।

३. निसर्गविरोधिनी चेयं पयःपावकयोरिव धर्मक्रोधयोरेकत्र वृत्तिः ।

४.स्वार्थालसाः परोपकारदक्षाश्च प्रकृतयो भवन्ति भव्यानाम् ।

५. सम्पत्कणिकामपि प्राप्य तुलेव लघुप्रकृतिरुन्नतिमायाति ।

**III. अयं गद्यभागः सप्रसङ्गं व्याख्येयः ।** **8**

१. यत्र च मातङ्गगामिन्यः शीलवत्यश्च, गौर्यो विभवरताश्च, श्यामाः पद्मरागिण्यश्च, धवलशुचिवदना मदिरामोदिश्वसनाश्च, चन्द्रकान्तवपुषः शिरीषकोमलाङ्ग्यश्च, अभुजङ्गगम्याकञ्चुकिन्यश्च पृथुकलत्रश्रियो मधुरभाषिण्यश्च अप्रमत्ताः प्रसन्नोज्वलमुखरागाश्च अकौतुकाः प्रोढाश्च प्रमादः ॥

**अथवा पद्यद्वयं सप्रसङ्गं व्याख्यात ।**

१. अतिगम्भीरे भूपे कूप इव जनस्य निरवतारस्य ।
दधति समीहितसिद्धिं गुणवन्तः पार्थिवाः घटकाः ॥

२. सुखप्रबोधललिता सुवर्णघटनेज्ज्वलैः ।
शब्दैराख्यायिका भाति शय्येव प्रातिपादकैः ॥

–अनुवर्तते

३. निजवर्षाहितस्नेहा बहुभक्तजनान्विताः ।
सुकाला इव जायन्ते प्रजापुण्येन भूभुजः ॥

**IV. पद्य सूत्राणि सलक्ष्यं व्याख्यात ।** **5x4= 20**

१. सर्वादेर्जस एत्वम् ।

२. भ्यसो हिन्तो सुन्तो ।

३. ययि तद्वर्गान्तः ।

४. नो णःसर्वत्र ।

५. कगचजतदपयवां प्रायो लोपः ।

६. उदुम्बरे दोर्लोपः ।

७. अत ओत् सोः ।

८. हरिद्रादीनां रो लः ।

**V. पञ्चानां प्राकृतरूपाणि सानुशासनं साधयत ।** **5x3= 15**

| | | | |
|---|---|---|---|
| १. सुकुमारः | २.वृक्षेण | ३. भवति | ४. सौन्दर्यम् |
| ५.विज्ञानम् | ६. शिथिलः | ७. पर्याणम् | ८. नूपुरम् |

**VI. एषु पञ्चानां संस्कृतरूपाणि विलिखत** **5x1= 5**

| | | | |
|---|---|---|---|
| १.णउलं | २. तारिसो | ३. जाणइ | ४. जीविअं |
| ५. गारवं | ६. केरिसो | ७. चिलादो | ८. चउद्दही |

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : UT-05**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्—सकलशास्त्रम्

## भागः - १, पत्रिका - ५

## विषयः - भारतीयदर्शनम्

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. लघूत्तराणि लिखत। (पञ्चानाम्)** **5x4= 20**

१. भरतस्य रससूत्रं लिखत।

२.नागेशभट्टस्य व्याकरणग्रन्थानि कानि ?

३.वेदाङ्गानि निरूपयत।

४. मीमांसादर्शनरीत्या चतुर्विंशगुणाः के ?

५. षोडशसंस्कारान् लिखत।

६. जैनदर्शने मोक्षसाधनानि कानि ?

७.न्यायदर्शनस्य षोडश पदार्थाः के ?

**II. प्रबन्धधक्रमेण उत्तराणि लिखत। (चतुर्णाम्)** **4x5= 20**

१.महाभाष्यस्य अध्ययनपरम्परां उद्दिश्य लिखत।

२. विशिष्टद्वैतदर्शनस्य तत्वस्वरूपं विवेचयत।

३. 'काव्यस्यात्मा ध्वनिः' ध्वनिकाररीत्या समर्थयत।

४. शक्तिविशिष्टाद्वैततत्वस्वरूपं लिखत।

५. स्कन्धत्रयात्मकं ज्योतिषं प्रतितपादयत।

६. द्वैतदर्शनसारं लिखत।

**III. टिप्पणीमारचयत (चतुर्णाम्)** **4x5= 20**

१. असत्कार्यवादः २. अनिर्वचनीयख्यातिः ३. विश्वनाथः ४. बृहत्संहिता

५. कुमारिलभट्टमते प्रमाणानि ६. अजीवतत्वम्

—०—

–अनुवर्तते

Total No. of Questions : 8] [ Total No. of Printed Pages :1

**Code No. : UT-06**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– व्याकरणम्

## भागः -१ , पत्रिका -१

## विषयः - व्याकरणमहाभाष्यम्

**दिनाङ्कः** - 18-03-2014 ] **[ गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना–अन्तिममनपहाय षट् प्रश्नाः समाधेयाः।**

**I.** सोदाहरणं यथाभाष्यम् 'ओत्' सूत्रं व्याख्यात। **12**

**II.** 'काशे वंशे' इत्यादौ प्रगृह्यसञ्ज्ञाप्रवृत्तिम् आशङ्क्य परिहरत। **12**

**III.** घुसञ्ज्ञायां प्रकृतिग्रहणप्रयोजनं प्रसाध्य खण्डयत। **12**

**IV.** सवर्णसञ्ज्ञासूत्रे 'आस्य' पदं विवेचयत। **12**

**V.** अनुनासिकसञ्ज्ञासूत्रमुपवर्ण्य मुखग्रहणप्रयोजनं वर्णयत। **12**

**VI.** संयोगसञ्ज्ञा समुदायस्य ? उत प्रत्येकम् ? विमृशत। **12**

**VII.** 'न वेति विभाषा' इति सूत्रे इतिकरणं कुतः ? विशदयत। **12**

**VIII.** **अ) एषु त्रीणि वार्त्तिकानि व्याख्यात।** **3x5= 15**

१. तस्यावचनं वचनप्रामाण्यात्।

२. वाक्यपरिसमाप्तेर्वा।

३. असिद्धे ह्याद्गुणाप्रसिद्धिः।

**आ) कारिकां वर्णयत** **5**

१. 'ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङितं विद्यात् वक्यस्मरणयोरङित्॥'

—०—

Total No. of Questions : 7 ]                                                    [ Total No. of Printed Pages :1

**Code No. : UT-07**

# स्नातकोत्तरपरीक्षा:—२०१४

## एम्.ए.१. — विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्— व्याकरणम्

## भागः -१ , पत्रिका -२

## विषयः - व्याकरणमहाभाष्यम्—२

**दिनाङ्कः** - 19-03-2014 ]                                                    [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ]                                             [ Max. Marks : 80

---

**सूचना—अन्तिममनपहाय षट् प्रश्नाः समाधेयाः।**

I. 'पाठेन धातुसञ्ज्ञायां समानशब्दप्रतिषेधः'इति वार्तिकस्य आशयं प्रतिपाद्य क्रियास्वरूपं व्याख्यात। **12**

II. उपदेश शब्दस्य व्याख्यानपुरस्सरम् उद्देशोपदेशयोः वैलक्षण्यं सकैयटं व्याख्यात। **12**

III. भाववचनो धातुः इत्यस्य आशयः कः ? सोदाहरणं व्याख्यात। **12**

IV. अन्योन्याश्रयपरिहारद्वारा हलन्त्यमिति सूत्रं व्याख्यात। **12**

V. 'तस्य' इति दलस्य प्रयोजनव्याख्यानपुरस्सरं 'तस्य लोपः' इति सूत्रं सकैयटं व्याख्यात। **12**

VI. अधिकारशब्दस्य विमर्शनं कृत्वा 'स्वरितेनाधिकारः' इति सूत्रं सकैयटं व्याख्यात। **12**

VII. **चतुर्णामेव टिप्पणीः लिखत** **5x4= 20**

१. क्रियावचनो धातुः।

२. इतरेतराश्रयं च प्रत्यये भाववचनत्वं तस्मान्प्रत्ययः।

३. इत्सञ्ज्ञायां सर्वप्रसङ्गोऽविशेषात्।

४. एकान्तस्तत्र उपलब्धेः।

५. उदिकूले रुजिवहोः।

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages :1

**Code No. : UT-08**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– व्याकरणम्

## भागः -१ , पत्रिका -३

## विषयः -वैयाकरणभूषणसारः–१

**दिनाङ्कः** - 20-03-2014 ] **[ गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना–अन्तिममनपहाय षट् प्रश्नाः समाधेयाः।**

**I.** 'चैत्रः तण्डुलं पचति' इत्यत्र शाब्दबोधः कः ? कथम् ? **12**

**II.** कौण्डभट्टमधिकृत्य लिखत। **12**

**III.** इमां कारिकां व्याख्यात– **12**

व्यापारो भावना सैवोत्पादना सैव च क्रिया।
कृञोऽकर्मकतापत्तेर्नहि यत्नोऽर्थ इष्यते॥

**IV.** 'फलव्यापारयोः धातुः' इति ग्रन्थाशयं समर्थयत। **12**

**V.** 'पश्य मृगो धावति' इत्यत्र भाष्यसिद्धा एकवाक्यता कीदृशी ? विशदयत। **12**

**VI.** शाब्दबोधमधिकृत्य लिखत। **12**

**VII.** 'वर्त्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति' इति कारिकार्थं विशदयत। **12**

**VIII.** **अधोनिर्दिष्टेषु चतुर्णामेव टिप्पणीः लिखत** **5x4= 20**

१. असत्त्वभूतो भावः।

२. प्रकृतिप्रत्ययौ सहार्थं ब्रूतः।

३. पक्ववान् कृतवान् पाकम्।

४.'पचति-पच्यते' इत्यत्र शाब्दबोधः।

५. तिङर्थस्तु विशेषणम्।

६. श्रीलक्ष्मीरमणं नौमि।

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages :1

**Code No. : UT-09**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्— व्याकरणम्

## भागः -१ , पत्रिका -४

## विषयः -वैयाकरणसिद्धान्तलघुमञ्जूषा—१

**दिनाङ्कः** - 21-03-2014 ] **[ गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना—अन्तिममनपहाय षट् प्रश्नाः समाधेयाः।**

I. 'तत्र वाक्यस्फटो मुख्यः'- ससन्दर्भं व्याख्यात। **12**

II. वृत्तेस्त्रैविध्यं विलिख्य शाब्दिकसम्मतां शक्तिं निरूपयत। **12**

III. प्रत्यक्षसामग्री न शाब्दबोधप्रतिबन्धिका कथम् ? विवृणुत। **12**

IV. शक्यार्थेनैव लाक्षणिकपदानां कथं साधुत्वं सिद्ध्यति ? **12**

V. टि-घु-भादीनां साधुत्वं कथमिति विमृशत। **12**

VI. तात्पर्यानुपपत्तिरेव लक्षणाबीजम्-इत्यत्र ग्रन्थकाराशयं लिखत। **12**

VII. सोदाहरणं लक्षणाभेदान् निरूपयत। **12**

**VIII. यथारुचि चतुर्णामेव लघुटिप्पणीः लिखत** **5x4= 20**

१. वैयाकरणसिद्धान्तलघुटिप्पणीः लिखत।

२. यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः।

३. ज्ञानं प्रयोक्तुरर्थस्य स्वरूपं च प्रतीयते।

४. अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते।

५. स्मृत्याचारविरोधे वा साम्यवैषम्यसंशये।

६. शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।

—०—

Total No. of Questions : 6] [ Total No. of Printed Pages :1

**Code No. : UT-10**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्— नवीनन्यायशास्त्रम्

## भागः -१ , पत्रिका -१

## विषयः -सव्यभिचारः

**दिनाङ्कः** - 18-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना—द्वितीयमनपहाय आहत्य पञ्च प्रश्नाः समाधेयाः।**

I. 'सामान्यलक्षणानन्तरमेव विशेषविभागो युक्तः' इति दीधितिकृतामाशयं स्पष्टयत। **15**

II. साध्यसंशयजनकेत्यादिलक्षणे कोटिद्वयोपस्थापकपदस्य प्रयोजनं लिखत। **20**

III. 'न चैवं नित्यो घटः शब्दत्वात्' इत्यत्र बाधाद्यवतारेऽसाधारण्यापत्तिः, इति दीधितिग्रन्थं सप्रसङ्गं व्याख्यात। **15**

IV. विप्रतिपत्तिस्तु प्रत्येकं न तथा, इति मणिग्रन्थं गादाधर्युक्तदिशा प्रतिपादयत। **15**

V. 'धर्मिणि यद्रूपावच्छिन्नवत्ताज्ञानं साध्यसंन्देहजनकं तद्रूपावच्छिनत्वस्योक्तत्वात्' इति दीधितेः आशयं प्रकयत। **15**

VI. सव्यभिचारं अधिकृत्य प्रबन्धमेकमारचयत **15**

—०—

Total No. of Questions : 3] [ Total No. of Printed Pages :2

**Code No. : UT-11**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– नवीनन्यायशास्त्रम्

## भागः -१ , पत्रिका -२

## विषयः -सत्प्रतिपक्षः

**दिनाङ्कः** - 19-03-2014 ] **[ गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. यथारुचि पञ्च प्रश्नाः समाधेयाः। अन्तिमप्रश्न अनिवार्यः। 16x5= 80**

१. सत्प्रतिपक्षस्य प्रथमपूर्वपक्षलक्षणं विलिख्य समन्वयं प्रदर्शयत।

२. निबन्धे तु हेत्वाभासानां फलद्वारकं लक्षणमिति दीधितिवाक्यं व्याख्यात।

३. सत्प्रतिपक्षस्थले कीदृशप्रतिबध्यप्रतिबन्धकाभावः अन्वेति ? कथमत्र पसस्परानुमितिप्रतिबन्धकत्वम् ?

४. मणिकारोक्तसत्प्रतिपक्षसिद्धान्तलक्षणं सलदकृत्यं लक्ष्ये योजयत।

५. सत्प्रतिपक्षस्य विभाजकलक्षणं सदलकृत्यं लक्ष्ये योजयत।

**६. यथारुचि चतुर्णां टिप्पणीः रचयत।**

१. हेत्वाभासः

२. गदाधरभट्टाचार्यः

३. प्रतिध्यप्रतिबन्धकभावः

४. दूषकताबीजम्

५. एकवाक्यत्वम्

—०—

Total No. of Questions : 10] [ Total No. of Printed Pages :2

**Code No. : UT-12**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.१. — विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्— नवीनन्यायशास्त्रम्

## भागः -१ , पत्रिका -३

## विषयः -शक्तिवाद इत्यादि

**दिनाङ्कः** - 20-03-2014 ] **[ गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

### प्रथमः भागः

### सूचना—यथारुचि त्रयाणामुत्तरं लिखत

**I.** पदार्थस्वरूपं विविच्य सङ्केतः कतिविधः ? इति विवेचयत । **10**

**II.** लाक्षणिकं च नानुभावकमेवेति वदतां मीमांसकानां मतमनूद्य खण्डयत । **10**

**III.** अत्र वदन्तीत्यादिना दर्शितं अन्विताभिधानवादनिाकरणं दर्शयत । **10**

**IV.** 'तद्विशिष्टे शक्तिः' इत्यस्यार्थं सप्रकरणं विवृणुत । **10**

### द्वितीयो भागः

### सूचना—पञ्चैव प्रश्नाः समाधेयाः ।

**I.** मुक्तौ प्रमाणमुपन्यस्य मोक्षाधिकारिणः के ? इति निर्दिशत । **10**

**II.** 'दुःखानुत्पाद एव मोक्षः' इति वदतां प्राभाकराणां मतमनूद्य निराकुरुत । **10**

**II.** अविद्यायाः पदार्थान्तरत्वमस्ति वा नवेति विमृशत । **10**

**IV.** 'नित्यसुखसाक्षात्कारस्य मुक्तित्वं सम्भवति वा ? भट्टाचार्याणामाशयं विशदयत । **10**

**V.** 'सर्वत्रात्मतत्वज्ञानमेव साक्षान्मोक्षे हेतुः' इत्यस्याभिप्रायं विवृणुत । **10**

**VI.** न्यायमते मुक्तिस्वरूपं किमिति निगदत । **10**

—०—

Total No. of Questions : 4] [ Total No. of Printed Pages :2

**Code No. : UT-13**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.१. – विद्धदुत्तमा - प्रथमवर्षः

## शास्त्रम्– नवीनन्यायशास्त्रम्

## भागः -१ , पत्रिका -४

## विषयः -व्युत्पत्तिवादः

**दिनाङ्कः** - 21-03-2014 ] **[ गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. द्वयं समाधेयम्** **16x2= 32**

१. अभेदः कुत्र संसर्गमर्यादया भासते इत्यत्र गदाधरोक्तं नियमं सम्यक् व्याख्यात ।

२. अभेदस्य विशेषणविभक्त्यर्थत्ववादिनामाशयमनुवदत ।

३. 'राजा पुरुषः' इत्यत्र कुतो न भेदान्वयबोधः ?

**II. द्वयं समाधेयम्** **10x2= 20**

१. नीलस्य घटः इत्यत्र कुतो न अभेदान्वयबोधः?

२. 'स्तोकं पचति' इति प्रयोगमुपपाद्य 'स्तोकः पाकः' इत्यत्र द्वितीयाप्रसङ्गं वारयत ।

३. भेदान्वयबोधश्च प्रातिपदिकार्थधात्वर्थयोः....इमं नियमं यथाग्रन्थं विवृणुत ।

**III. त्रयाणां टिप्पणीः रचयत ।** **6x3= 18**

१. पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन ।

२. प्रतियोगिविशेषिताभावज्ञानश्च विशिष्टवैशिष्ट्यमर्यादां नातिशेते ।

३. तदर्थकपदोत्तरविभक्त्या सङ्ख्याबोधने अभेदसम्बन्धावच्छिन्नप्रकारताभिन्नतदर्थविषयता-शालिशाब्दबोधसामग्री अपेक्षिता ।

४. विरुद्धसङ्ख्यावच्छिन्नवाचकशतादिपदोत्तरविभक्त्युपस्थाप्या सङ्ख्या प्रकृत्यर्थतावच्छेदकसङ्ख्यायामेव अन्वेति ।

**IV. अङ्कानुगुणं लिखत**

१. 'वेदाः प्रमाणम्' इत्यत्र एकत्वं कुत्र अन्वेति ? कुतः ? २

२. 'त्रयः समुदिता हेतुः' अत्र हेतुपदस्य अर्थः कः ? एकत्वान्वयः कुत्र? तत्प्रयोजनं किम् ? ३

–अनुवर्तते

३. विभक्तिः कतिविधा ? १

४. आख्यातद्विवचनबहुवचनयोस्तु सङ्ख्याबोधकत्वमावश्यकम् । कुतः ? २

५. गुणादिवाचकपदोत्तरद्विवचनबहुवचनयोः कोऽर्थः ? २

—०—

Total No. of Questions : 7] [ Total No. of Printed Pages :1

**Code No. : UT-14**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– प्राचीनन्यायशास्त्रम्

## भागः -१ , पत्रिका -१

## विषयः -शब्दशक्तिप्रकाशिका–१

**दिनाङ्कः** - 18-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना–अन्तिममनपहाय पञ्चैव प्रश्नाः समाधेयाः। अन्त्यो विंशत्यङ्कः। इतरे पञ्चदशाङ्काः पृथक् पृथक्।**

I. शब्दप्रामाण्यं पृथक् यथाग्रन्थं प्रतिपादयत।

II. जातिशक्तिवादमनूद्य खण्डयत।

III. शक्तिग्राहकाणि वर्णयत।

IV. वाक्यलक्षणं वर्णयित्वा वाक्यविभागं दर्शयत।

V. कर्मधारयसमासं नातिसङ्क्षेपविस्तरं निरूपयत।

VI. द्वितीयार्थं परिष्कृत्य वर्णयत।

**VII. काञ्चिदेकां कारिकां सावतरणं व्याख्यात** **20**

अ. अनुभवहेतुः सकले सद्यः समुपासिता मनुजे।
साकाङ्क्षासान्ना च स्वार्थे योग्या सरस्वती देवी॥

आ. यदीयेन सुबर्थेन युतयद्बोधनक्षमः।
यः समासस्तस्य तत्र स तत्पुरुष उच्यते॥

—०—

Total No. of Questions : 6] [ Total No. of Printed Pages :1

**Code No. : UT-15**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.१. – विद्धदुत्तमा - प्रथमवर्षः

### शास्त्रम्— प्राचीनन्यायशास्त्रम्

### भागः -१ , पत्रिका -२

### विषयः -शब्दशक्तिप्रकाशिका—२

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना—यथारुचि चत्वारः प्रश्नाः समाधेयाः। सर्वे समानाङ्काः।**

**I.** क्रिया-कारकयोः स्वरूपं सम्बन्धश्च निष्कर्षयत। **20**

**II.** द्वितीयाविभक्त्यर्थान् सङ्गृह्णीत। **20**

**III.** तिङ्विभक्त्यर्थं परिष्कुरुत। **20**

**IV.** लिडर्थविचारं सङ्क्षेपेणानुवदत। **20**

**V.** चातुरर्थिकप्रत्ययार्थान् सङ्गृह्णीत। **20**

**VI.** उपपदविभक्तीः यथाग्रन्थं प्रतिपादयत। **20**

—०—

Total No. of Questions : 7] [ Total No. of Printed Pages :1

**Code No. : UT-16**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.१. – विद्धदुत्तमा - प्रथमवर्षः

## शास्त्रम्– प्राचीनन्यायशास्त्रम्

## भागः -१ , पत्रिका -३

## विषयः -न्यायकन्दली–१

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना–अन्तिममनपहाय पञ्च प्रश्नाः समाधेयाः।**

| | | |
|---|---|---|
| I. | ग्रन्थानुरोधेन मङ्गलपद्यं निरूप्य मङ्गलवादं समर्थयत। | **15** |
| II. | द्रव्यग्रन्थोक्तउद्देशप्रकरणं सङ्गृह्णीत। | **15** |
| III. | ग्रन्थोक्तदिशा पृथिवीनिरूपणं कुरुत। | **15** |
| IV. | जलनिरूपणं कुरुत। | **15** |
| V. | तेजो निरूप्यताम्। | **15** |
| VI. | वायुं निरूपयत। | **15** |
| VII. | ग्रन्थोक्तदिशा मनोनिरूपणं कुरुत। | **20** |

—०—

Total No. of Questions : 6] [ Total No. of Printed Pages :1

**Code No. : UT-17**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– प्राचीनन्यायशास्त्रम्

## भागः -१ , पत्रिका -४

## विषयः -न्यायमञ्जरी–१

**दिनाङ्कः** - 21-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना–अन्तिममनपहाय यथारुचि पञ्च प्रश्नाः समाधेयाः । सर्वे समानाङ्काः ।**

I. सामग्र्याः करणत्वं सयुक्ति ग्रन्थोक्तदिशा समर्थयत ।

II. ज्ञाततालिङ्गकानुमानमुपपाद्य सयुक्ति निराकुरुत ।

III. धर्मकीर्त्युक्तप्रमाणसामान्यलक्षणमुपपाद्य ग्रन्थोक्तदिशा निराकुरुत ।

IV. प्रत्यक्षलक्षणप्रतिपादकसूत्रं ग्रन्थोक्तदिशा व्याख्याय दलप्रयोजनं वर्णयत ।

V. परसम्मतप्रत्यक्षलक्षणं प्रतिपाद्य तत्रत्यदोषानुपपादयत ।

VI. **इमानि सावतरणं व्याख्यात ।** **20**

१.प्रमाणसंप्लववादः ।

२. शक्तेरतिरिक्तपदार्थत्वम् ।

३. जयन्तभट्टः

४. अर्थापत्तिः ।

—०—

Total No. of Questions : 5] [ Total No. of Printed Pages :1

**Code No. : UT-18**

# स्नातकोत्तरपरीक्षा:–२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– धर्मशास्त्रम्

## भागः -१ , पत्रिका -१

## विषयः -निर्णयसिन्धुः–१

**दिनाङ्कः** - 18-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना–यथारुचि चत्वारः प्रश्नाः समाधेयाः।**

I. ग्रन्थकृता कृतं मङ्गलाचरणं विलिख्य, अब्दानां पञ्चविधत्वं, संवत्सरनामानि, तथा संवत्सरनिर्णयश्च लिखत। **20**

II. मलमासक्षयमासनिर्णयः ग्रन्थकृता कथमुपवर्णितः ? लिखत। **20**

III. सिनीवालीलक्षणं कुहूलक्षणं कुतपकाललक्षणं ग्रहणनिर्णयं च ग्रन्थोक्तदिशा विवृणुत। **20**

IV. समुद्रस्नाननियमान्, समुद्रार्घ्यमन्त्रान्, समुद्रतर्पणक्रमं च लिखत। **20**

V. प्रकीणकनिर्णये संस्कारेषु गर्भाधानम्, तत्र प्रथमरजोदर्शने दुष्टतिथि वार-नक्षत्र लग्नफलं निरूपयत। **20**

—०—

Total No. of Questions : 10] [ Total No. of Printed Pages :1

**Code No. : UT-19**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– धर्मशास्त्रम्

## भागः -१ , पत्रिका -२

## विषयः -मनुस्मृतिः–१

**दिनाङ्कः** - 19-03-2014 ] **[ गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना–यथारुच्यशीत्यङ्कानामुत्तरं लिखत**

| | | |
|---|---|---|
| **I.** | धर्मस्वरूपं विलिखत। | **10** |
| **II.** | वेदत्रयं ब्रह्मा कथं दुदोह ? नारायणपदनिर्वचनं किम् ? | **05** |
| **III.** | जपयज्ञप्रशंसां प्रकाशयत । | **05** |
| **IV.** | अभिवादन-प्रत्यभिवादनधर्मान् विवृणुत । | **10** |
| **V.** | आचार्य-उपाध्याय-गुरु-ऋत्विजां निर्वचनानि स्पष्टयत। | **10** |
| **VI.** | ब्रह्मचर्यधर्मान् सङ्गृह्णीत। | **5** |
| **VII.** | स्त्रीप्रशंसां प्रकाशयत। | **10** |
| **VIII.** | 'नार्तैनाप्यवमन्तव्या' इत्युक्तम्, ते के ? तेषां प्रशंसां प्रकाशयत। | **10** |
| **IX.** | वानप्रस्थधर्मान् सङ्गृह्णीत। | **10** |
| **X.** | अन्नदोषान् विवृणुत। | **10** |

—०—

Total No. of Questions : 7] [ Total No. of Printed Pages :1

**Code No. : UT-20**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.१. — विद्धदुत्तमा - प्रथमवर्षः

## शास्त्रम्— धर्मशास्त्रम्

## भागः -१ , पत्रिका -३

## विषयः -कालमाधवीयम्

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना—अन्तिममनपहाय षट् प्रश्नाः समाधेयाः।**

**I.** संवत्सरस्वरूपं भेदश्च यथाग्रन्थं विमृश्य लिखत। **15**

**II.** मलमासस्वरूपं तत्र वर्ज्यावर्ज्यञ्च ग्रन्थोक्तदिशा विवृणु। **15**

**III.** एकभक्तं नक्तमयाचितञ्च यथाग्रन्थं विवृणुत। **15**

**IV.** गणेशचतुर्थीव्रतानुष्ठानकालं यथाग्रन्थं विवृणुत। **15**

**V.** षष्ठीनिर्णयप्रकारं यथाग्रन्थं विवृणुत। **15**

**VI.** तृतीयातिथिनिर्णयं यथाग्रन्थमनुवदत। **15**

**VII.** एकस्यार्थविवरणं कुरुत- **05**

१.पार्वणम् २. तिथिः

—०—

Total No. of Questions : 8] [ Total No. of Printed Pages :1

**Code No. : UT-21**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्— धर्मशास्त्रम्

## भागः -१ , पत्रिका -४

## विषयः -व्यवहारमयूखः (दायभागः)

**दिनाङ्कः** - 21-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I.** दायः केषां न देयः ? विवृणुत। **10**

**II.** दायविभागः किं पितरि जीवति कार्य उत तदूर्ध्वम् ? विवेचयत। **10**

**III.** पितृमरणानन्तरं विभागक्रमं नैकभ्रातृपुत्राणां विभागक्रमं च स्पष्टयत। **10**

**IV.** असंस्कृतभ्रातरि सति विशेषं विभागोत्तरं जातपुत्रे च दायविभागक्रमं प्रकाशयत। **10**

**V.** विजातीयपुत्रविभागक्रमं निरूपयत। **10**

**VI.** शौनकोक्तं पुत्रप्रतिग्रहविधिं व्याख्यात। **10**

**VII.** विद्याधनं सर्वं किमविभाज्यम्। विवृणुत। **10**

**VIII.** विभक्तानां धर्मानुष्ठानं किमैक्येन उत पृथक् ?विवृणुत। **10**

—०—

Total No. of Questions : 10] [ Total No. of Printed Pages :1

**Code No. : UT-22**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– ज्योतिश्शास्त्रम्

## भागः -१ , पत्रिका -१

## विषयः -सिद्धान्तशिरोमणिः (ग्रहगणितम्) —१

**दिनाङ्कः** - 18-03-2014 ] **[ गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना—अन्तिममनपहाय षट् प्रश्नाः समाधेयाः।**

**I.** 'ग्रहास्तु साध्या मनुजैः स्वमानात्' इत्यस्याशयं निरूप्य मनुष्यमानस्य स्वरूपं सम्यग्विशदयत। **12**

**II.** 'उपपत्तिमानेव आगमः प्रामाण्यम्' इतीममंशं सम्यग्विवेचयत। **12**

**III.** रविमन्दोच्चभगणोपपत्तिं कुट्टकद्वारा प्रदर्शयत। **12**

**IV.** ज्ञातेऽर्के अवमशेषाच्चन्द्रानयनं सोपपत्ति निरूपयत। **12**

**V.** प्रतिवृत्तभङ्गिद्वारा फलोपपत्तिं निरूपयत। **12**

**VI.** स्वकक्षायाः स्वरूपं निरूप्य ग्रहकक्षानयनं रवीन्दुभकक्षाप्रमाणं च विलिखत। **12**

**VII.** अहर्गणानयनक्रमं सम्यगुपपादयत। **12**

**VIII.** प्रकरद्वयेन दिनाद्यानयनं सोदाहरणं निरूपयत। **12**

**IX.** प्रकारचतुष्टयेन कर्णानयनं उपपादयत। **12**

**X.** चतुर्णां टिप्पणीः रचयत। **5x4= 20**

१. ब्राह्ममानम् २. देशान्तरम्

३. क्षयाहाः ४. भूपरिधिस्फुटीकरणम्

५. शुद्धिः ६. लङ्कोदयसाधनम्

—०—

Total No. of Questions : 5] [ Total No. of Printed Pages :2

**Code No. : UT-23**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

### शास्त्रम्– ज्योतिश्शास्त्रम्

### भागः -१ , पत्रिका -२

### विषयः -गोलाध्यायः –१

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. पञ्चानां विस्तरेण उत्तरं लिखत ।** **10x5= 50**

१. भूस्वरूपविषये बौद्धजैनपुराणानामुक्तिं निराकृत्य 'समो यतः स्यात् परिधेः शतांशः' इत्यस्याशयं स्पष्टयत ।

२. भुवः उत्तरदक्षिणगोलयोः देश-पर्वत-समुद्राणां स्थितिं सालेख्यं विषदयत ।

३. लल्लोक्तं भूपृष्ठफलं निराकृत्य भास्करोक्तं गोलपृष्ठफलानयनसूत्रं सदृष्टान्तं समर्थयत ।

४. कतिभिः सौरमासैः एकः अधिकमासः पतति ? सोपपत्तिं व्याख्यात ।

५. अहर्गणनानीतग्रहाणाम् उदयान्तरसंस्कारः किमर्थं कार्यः ? संस्कारक्रमं च विशदयत ।

६. ग्रहस्फुटीकरणयुक्तिं नीचोच्चवृत्तभङ्ग्या सालेख्यं स्पष्टयत ।

७. बुधशुक्रपातभगाणानं वैशिष्ट्यं निरूप्य शरानयनगणितोपपत्तिं विशदयत ।

८. अहर्गणानयने विजातीययोः सौरचान्द्रमासयोः योगे अधिमासावमशेषयोः त्यागे च कारणं स्पष्टयत ।

**II. पङ्क्तिद्वयं सावतरणं व्याख्यात ।** **5x2= 10**

१. एका गतिः सा प्रतिभानमन्यत् प्राज्ञैः फलार्थं प्रविकल्पितं तत् ।

२. भगोलवृत्तैः सहितः खलोलो दृग्गोलसञ्ज्ञोऽपममण्डलाद्यैः ।

३. कक्षामध्यगतिर्यग्रेखाप्रतिवृत्तसम्पाते ।

**III. द्वयोः टिप्पणीमारचयत ।** **5x2= 10**

१. गोलप्रशंसा २. अयनचलनम्

३. मन्दकर्मणि कर्णानुपातः ४. चत्वारः प्रलयभेदाः ।



–अनुवर्तते

**IV.** रिक्तस्थानानि पूरयत । **6x 1= 06**

१. भास्करः .........शास्त्रं ब्राह्म्याः सदनं प्राह ।

२. द्वौ द्वौ रवीन्दू इति................अब्रुवन् ।

३. अब्दे मध्यमसावनसङ्ख्या भभ्रमतो...........।

४. योजनसङ्ख्यया कुपरिधिः............प्रोक्तः ।

५. क्षारसिन्धोरुदक्स्थं भूमेरर्धं...........प्राहुः ।

६. दर्शाग्रतः सङ्क्रमकालतः प्राक् सदैव.........तिष्ठति ।

**V.** यथायथं योजयत **4x 1= 04**

| | | |
|---|---|---|
| १. चैत्ररथम् | — | श्वेतजलम् |
| २. नन्दनम् | — | अरुणम् |
| ३. धृतिः | — | मानसम् |
| ४. वैभ्राजम् | — | महाह्रदम् |

—०—

Total No. of Questions : 10] [ Total No. of Printed Pages :1

**Code No. : UT-24**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.१. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– ज्योतिश्शास्त्रम्

## भागः -१ , पत्रिका -३

## विषयः -श्रीपतिपद्धतिः–१

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना–अन्तिममनपहाय षट् प्रश्नाः समाधेयाः।**

**I.** राश्यादिलग्नस्फुटः ५-१-४९ राश्यादिगुरुस्फुटः ०-२९-२१ ग्रहाणां दिग्बलस्थानं निरूप्य, अत्र गुरोः दिग्बलं साधयत। **12**

